श्री हाटकेश्वराष्टकं

श्री हाटकेश्वराष्टकं

जटातटांतरोल्लसत्सुरापगोर्मिभास्वरं
ललाटनेत्रमिंदुनाविराजमानशेखरं |
लसद्विभूतिभूषितं फणींद्रहारमीश्वरं
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 1 ||

पुरांधकादिदाहकं मनोभवप्रदाहकं
महाघराशिनाशकं अभीप्सितार्थदायकं |
जगत्त्रयैककारकं विभाकरं विदारकं
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 2 ||

मदीय मानसस्थले सदाऽस्तु ते पदद्वयं
मदीय वक्त्रपंकजे शिवेति चाक्षरद्वयं |
मदीय लोचनाग्रतः सदाऽर्धचंद्रविग्रहं
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 3 ||

भजंति हाटकेश्वरं सुभक्तिभावतोत्रये
भजंति हाटकेश्वरं प्रमाणमात्र नागराः |
धनेन तेज साधिकाः कुलेन चाऽखिलोन्नताः
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 4 ||

सदाशिवोऽहमित्यहर्निशं भजेत यो जनाः
सदा शिवं करोति तं न संशयोऽत्र कश्चन |
अहो दयालुता महेश्वरस्य दृश्यतां बुधा
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 5 ||

धराधरात्मजापते त्रिलोचनेश शंकरं
गिरीश चंद्रशेखराऽहिराजभूषणेश्वरः |
महेश नंदिवाहनेति संघटन्नहर्निशं
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 6 ||

महेश पाहि मां मुदा गिरीश पाहि मां सदा
भवार्णवे निमज्जतस्त्वमेव मेऽसि तारकः |
करावलंबनं झटित्यहोऽधुना प्रदीयतां
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 7 ||

धराधरेश्वरेश्वरं शिवं निधीश्वरेश्वरं
सुरासुरेश्वरं रमापतीश्वरं महेश्वरं |
प्रचंड चंडिकेश्वरं विनीत नंदिकेश्वरं
नमामि नाटकेश्वरं भजामि हाटकेश्वरं || 8 ||

हाटकेशस्य भक्त्या यो हाटकेशाष्टकं पठेत् |
हाटकेश प्रसादेन हाटकेशत्वमाप्नुयात् || 9 ||

इति श्री हाटकेश्वराष्टकं |